श्री विष्णु कवच स्तोत्रं

श्री विष्णु कवच स्तोत्रं

ध्यानं –

शांताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाकारं गगनसदृशं मेघवर्णं शुभांगं |
लक्ष्मीकांतं कमलनयनं योगिहृद्ध्यानगम्यं
वंदे विष्णुं भवभयहरं सर्वलोकैकनाथं ||

कवचं –

ॐ | पूर्वतो मां हरिः पातु पश्चाच्चक्री च दक्षिणे |
कृष्ण उत्तरतः पातु श्रीशो विष्णुश्च सर्वतः || 1 ||

ऊर्ध्वमानंदकृत् पातु अधस्ताच्छार्ङ्गभृत् सदा |
पादौ पातु सरोजांघ्रिः जंघे पातु जनार्दनः || 2 ||

जानुनी मे जगन्नाथः ऊरू पातु त्रिविक्रमः |
गुह्यं पातु हृषीकेशः पृष्ठं पातु ममाव्ययः || 3 ||

पातु नाभिं ममानंतः कुक्षिं राक्षसमर्दनः |
दामोदरो मे हृदयं वक्षः पातु नृकेसरी || 4 ||

करौ मे काळियारातिः भुजौ भक्तार्तिभंजनः |
कंठं कालांबुदश्यामः स्कंधौ मे कंसमर्दनः || 5 ||

नारायणोऽव्यान्नासां मे कर्णौ केशिप्रभंजनः |
कपोले पातु वैकुंठो जिह्वां पातु दयानिधिः || 6 ||

आस्यं दशास्यहंताऽव्यान्नेत्रे मे हरिलोचनः |
भ्रुवौ मे पातु भूमीशो ललाटं मे सदाऽच्युतः || 7 ||

मुखं मे पातु गोविंदः शिरो गरुडवाहनः |
मां शेषशायी सर्वेभ्यो व्याधिभ्यो भक्तवत्सलः || 8 ||

पिशाचाग्नि जलेभ्यो मामापद्भ्यो पातु वामनः |
सर्वेभ्यो दुरितेभ्यश्च पातु मां पुरुषोत्तमः || 9 ||

इदं श्रीविष्णुकवचं सर्वमंगळदायकं |
सर्वरोगप्रशमनं सर्वशत्रुविनाशनं || 10 ||

इति श्री विष्णु कवचं |